श्रीकमलांबिका स्तवः

कमलालयतटशोभितविमलालयविलसत्
कमलापति-कमलासन-कमलार्चितविभवं ।
कमलांघ्रिक-कमलानन-कमलांबिक-विलसत्
कमलाभिधमहमांतरकमले मम कलये ॥1॥

यजनपर-मनुजवर-शिववदनजार्चितां
भजनपर-सनकमुख-मुनिहृदयसंस्थितां ।
अजजनक-हयवदन-हरिहयसुपूजितां
भज हृदय रविजलज गुरुवरदशांकरीं ॥2॥

ईशानकोणे कमलालयस्य श्रीत्यागराजस्य तु वायुकोणे ।
ईशानदृष्टिः कमलांबिकायाः या भाति सा श्रीरमृता सतां हि ॥3॥

मदंबिका हृत्कमलांतरस्था चिदंबिका श्रीकमलालयस्था ।
अनंतसौख्यं कमलासनस्था तनोतु देवी कमलांबिका मे ॥4॥

अनिंधनं समेधिते निरंतरं हृदंतरे
चिदाशुशुक्षणौ महाविमोहरात्रिनाशके ।
अवाच्यवैभवे परे विचित्रमाविकासिते
जुहोम्यहं धरादिमं शिवांततत्त्वमंबिके ॥5॥

अक्षरत्रयरूपिणीमखिलाक्षवृत्तिविनाशिनीं
ऋक्षराजसुभावितामृताक्षरांघ्रियुगां भजे ।
अक्षरासनसंस्थितामजशिक्षकेभमुखप्रियां
चिक्षुरादिविनाशिनीं वरलक्षणां कमलांबिकां ॥6॥

मकारवर्जं तव वामनेत्रबिंद्वाढ्यमाद्ये कमलेति नाम ।
श्रीकामरजाख्यवरार्णरूपं भजंति साध्याः स्वकबोधसिद्धये ॥7॥सान्याः?
स्वरेश चंद्राह्वयशीतबीजत्रयाढ्यमाधे कमलेति नाम ।
मकारवर्जं तव मूलविद्यां विद्योतयत्येव गुरुस्वरूपे ॥8॥

शांतस्वरूपा विमलप्रकाशा त्वमात्मरूपा च गुहांतरस्था ।
मातश्चिदानंदतनुर्विभासि त्वमंबिकेऽनंतसुखप्रदात्रि ॥9॥

अनंतसूत्रग्रथिता सुवर्णमालातिमाधुर्यवचस्सुमाढ्या ।
गुरुस्वरूपा कमलांबिका या तदंघ्रिपद्मं समलंकरोतु ॥

॥इति श्रीमच्चिदानंदनाथाख्य सद्गुरुपादाब्जामृतपायिना
अनंतानंदनाथेन रचितः श्रीकमलांबिकास्तवः संपूर्णः ॥